# Shri Aghora Ashtakam

# શ્રીઅઘોરાષ્ટકમ્

## Document Information

Text title : Shri Aghora Ashtakam 02 50

File name : aghorAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-50

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

Shri Aghora Ashtakam

# શ્રીઅઘોરાષ્ટકમ્

કાલાભ્રોત્પલકાલગાત્રમનલજ્વાલોર્ધ્વકેશોજ્જ્વલં
દંષ્ટ્રાદ્યસ્ફુટદોષ્ઠબિમ્બમનલજ્વાલોગ્રનેત્રત્રયમ્ ।
રક્તાકોરકરક્તમાલ્યરચિતં(રુચિરં)રક્તાનુલેપપ્રિયં
વન્દેઽભીષ્ટફલાપ્તયેઽઙ્ઘ્રિકમલેઽઘોરાસ્ત્રમન્ત્રેશ્વરમ્ ॥ ૧॥

જઙ્ઘાલમ્બિતકિઙ્કિણીમણિગણપ્રાલમ્બિમાલાઞ્ચિતં
(દક્ષાન્ત્રં)ડમરું પિશાચમનિશં શૂલં ચ મૂલં કરૈઃ ।
ઘણ્ટાખેટકપાલશૂલકયુતં વામસ્થિતે બિભ્રતં
વન્દેઽભીષ્ટફલાપ્તયેઽઙ્ઘ્રિકમલેઽઘોરાસ્ત્રમન્ત્રેશ્વરમ્ ॥ ૨॥

નાગેન્દ્રાવૃતમૂર્ધ્નિજ(ર્ધજ) સ્થિત(શ્રુતિ)ગલશ્રીહસ્તપાદામ્બુજં
શ્રીમદ્દોઃકટિકુક્ષિપાર્શ્વમભિતો નાગોપવીતાવૃતમ્ ।
લૂતાવૃશ્ચિકરાજરાજિતમહાહારાઙ્કિતોરસ્સ્થલં
વન્દેઽભીષ્ટફલાપ્તયેઽઙ્ઘ્રિકમલેઽઘોરાસ્ત્રમન્ત્રેશ્વરમ્ ॥ ૩॥

ધૃત્વા પાશુપતાસ્ત્રનામ કૃપયા યત્કુણ્ડલિ(યત્કૃન્તતિ)પ્રાણિનાં
પાશાન્યે ક્ષુરિકાસ્ત્રપાશદલિતગ્રન્થિં શિવાસ્ત્રાહ્વયં (?) ।
વિઘ્નાકાઙ્ક્ષિપદં પ્રસાદનિરતં સર્વાપદાં તારકં
વન્દેઽભીષ્ટફલાપ્તયેઽઙ્ઘ્રિકમલેઽઘોરાસ્ત્રમન્ત્રેશ્વરમ્ ॥ ૪॥

ઘોરાઘોરતરાનનં સ્ફુટદૃશં સમ્પ્રસ્ફુરચ્છૂલકં
પ્રાજ્યાં(જ્યં)નૃત્તસુરૂપકં ચટચટજ્વાલાગ્નિતેજઃકચમ્ ।
(જાનુભ્યાં)પ્રચટત્કૃતા(રિનિકરં)સ્ત્રગ્રુણ્ડમાલાન્વિતં
વન્દેઽભીષ્ટફલાપ્તયેઽઙ્ઘ્રિકમલેઽઘોરાસ્ત્રમન્ત્રેશ્વરમ્ ॥ ૫॥

ભક્તાનિષ્ટકદુષ્ટસર્પદુરિતપ્રધ્વંસનોદ્યોગયુક્
હસ્તાગ્રં ફણિબદ્ધહસ્તચરણં પ્રારબ્ધયાત્રાપરમ્ ।
સ્વાવૃત્ત્યાસ્થિતભીષણાઙ્ગનિકરપ્રારબ્ધસૌભાગ્યકં ?
વન્દેઽભીષ્ટફલાપ્તયેઽઙ્ઘ્રિકમલેઽઘોરાસ્ત્રમન્ત્રેશ્વરમ્ ॥ ૬॥

યન્મન્ત્રાક્ષરલાઞ્છિતાપઘનવન્મર્ત્યાશ્ચ(ચ્ચ) વજાર્ચિષો
    ભૂતપ્રેતપિશાચરાક્ષસકલાનિર્ઘાતપાતા ઇવ(દિવ) ।
ઉત્સન્નાશ્ચ ભવન્તિ સર્વદુરિતપ્રોચ્ચાટનોત્પાદકં
    વન્દેઽભીષ્ટફલાપ્તયેઽઙ્ઘ્રિકમલેઽઘોરાસ્ત્રમન્ત્રેશ્વરમ્ ॥ ૭॥

યદ્ધ્યાનો ધ્રુવપૂરુષો(ધ્યાનોદ્યતપૂરુષો)ષિતગૃહગ્રામસ્થિરાસ્થાયિનો
    ભૂતપ્રેતપિશાચરાક્ષસપ્રતિહતા નિર્ઘાતપાતા ઇવ ।
યદ્રૂપં વિધિના સ્મરન્ હિ વિજયી શત્રુક્ષયં પ્રાપ્નુતે
    વન્દેઽભીષ્ટફલાપ્તયેઽઙ્ઘ્રિકમલેઽઘોરાસ્ત્રમન્ત્રેશ્વરમ્ ॥ ૮॥

॥ ઇતિ શ્રીઅઘોરાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

---

*Shri Aghora Ashtakam*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*